No. ४५९३

Title त्रिपिण्डैकपिण्ड श्राद्ध प्रयोगः

Author ×

Extent ९ पत्राणि Age सं० १८२४

Subject धर्मशास्त्रम्

त्रिपिण्डैकपिण्डश्राद्धप्रयोगः

४४९२

4593
F. = 9

श्रीगणेशायनमः॥ अथ त्रिपिंडश्राद्धप्रयोगः॥ तत्र भूतप्रेतादिजनितदुष्टज्वराद्युपद्रवशांतये

श्रीगणेशाय नमः ॥ अथ त्रिपिण्डश्राद्धप्रयोगः ॥ तत्र भूतप्रेतोन्मादिजनितदुष्टज्वराद्यु
पद्रवशान्तये कर्तव्यं ॥ कार्त्तिकादिचतुर्षु मासेषु शुक्लपक्षे एकादश्यां पंचम्यामष्टम्यां
त्रयोदश्यां उभयोरपि पक्षयोः कार्यं ॥ दोषबाहुल्ये सति न कालापेक्षा ॥ नद्यां पुण्यती
र्थे तदभावे शिवायतने तुलसीसन्निधौ अश्वत्थसन्निधौ वा कार्यं ॥ तत्र सुप्रदेशे
संमार्जनोपलेपनाभ्यां भूमिं संशोध्य तत्र संभारान् संन्यस्य श्राद्धमारभेत ॥ प्रातःस्ना
नादिकृतनित्यक्रियः शुद्धान् सदाचारसंपन्नान् द्विजानाहूय मध्याह्ने कृतमा
ध्याह्निकः शुद्धवाससी परिधाय सुपीठे प्राङ्मुख उपविश्य आचम्य प्राणानायम्य
देशकालौ संकीर्त्य अस्मत्कुले मृतानां दुर्गतिगतानां समुद्धरणार्थं अमुकस्य शरी
रे ज्वरादिउपद्रवसर्वरोगशान्त्यर्थं ब्रह्मविष्णुरुद्राणां प्रीत्यै एकोद्दिष्टविधानेन पिंडत्र
यविधानरूपं श्राद्धमहं करिष्ये ॥ इति संकल्प्य ब्राह्मणान् वरयेत् ॥ स्वयं प्राङ्मुख उद

प्रमुखं ब्राह्मणमुपवेश्य यथामाद्यदक्षिणाञ्जान्वाच्य गोत्रप्रवरं सामवेदस्य कौथु
मी शाखाध्यायिनं अमुकशर्माणं पिण्डत्रयविधानरूपश्राद्धकर्मणि ब्रह्मस्थूलजपार्थं
त्वामहं वृणे। स्थूलजपं कुरु। तत्ते पाद्यमित्यादि। एवं द्वितीयमुपवेश्य गोत्राद्युच्चार्य
विष्णुस्थूलजपार्थं त्वामहमित्यादि॥ तृतीयमुपवेश्य गोत्राद्युच्चार्य रुद्रस्थूलजपा
र्थमित्यादि॥ ततस्तान् चन्दनपुष्पवस्त्रादिभिः पूजयेत्॥ ततः श्राद्धदेशात्प्राच्या
मुदकुम्भसंस्थं कलशत्रयं यथाविधिना संस्थाप्य शुद्धजलेनापूर्य। सर्वौषधि
सुवर्णादि निक्षिप्य शुक्लवस्त्रेण वेष्ट्य पूर्णपात्रेण पिधाय राजतीं प्रतिमां ब्र
ह्मकलशे सौवर्णीं विष्णुकलशे ताम्रीं रुद्रकलशे संन्यस्य ब्रह्मजज्ञानमिति ब्रह्मा
णमावाहयेत्। इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। आवाह्य प्रतिष्ठां कृत्वा
पूजयेत्॥ ब्रह्मजज्ञानमिति ब्रह्माणं। इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। स
र्वां चन्दनादिभिः संपूज्य पृथक् नैवेद्यानि दद्यात्॥ ततः स्थूलानि ब्राह्मणैः पानी

यानि ॥ ब्रह्मणः स्वच्छसामानि ॥ ब्रह्मा । ब्रा २३ ह्मा । हाउ स्वरताहे । हाउ ३ । आनो य
भुवायि । इति ॥ इदं विष्णुरित्यादि विष्णुसंहितां ॥ आवो राजेति रुद्रसंहितां । ज
पानंतरं जपसंकल्पः ॥ अनेन ब्रह्मसूक्तजपेन ब्रह्मा प्रीयतां । विष्णुसूक्तजपेन
विष्णुः प्रीयतां । रुद्रसूक्तजपेन रुद्रः प्रीयतां ॥ एवं जपं निवेद्य श्राद्धमारभेत् ॥
श्राद्धस्थाने ब्राह्मणाननुपवेश्य यथानादाय । अत्रोधनैः ० । देवेक्षणः क्रियतां । दे
2 वेधनेणि एतद्वः पाद्यमित्यादि । एवं त्रिष्वपि ॥ आचमनं । भूर्भुवः स्वः समाधं । स
मास्महे । आचमनं । प्राणायामः । गायत्रसामपठनं । प्रसादं कृत्वा पिंडत्रयवि
धानेन श्राद्धकारयस्वं । अग्निष्वात्ताः ० । श्राद्धभूमौ ० । सप्तव्याधा ० । देवताभ्य ० ।
अपवित्रः ० । पात्रे जलमाप्य येदशा गायत्री । एतोन्विंद्रं । पृथिव्या ० । भवतां ० । पिं
डत्रयश्राद्धोपहारणी पवित्रतास्तु ॥ देशकाल ० । अद्याद्यमासे पक्षे तिथौ । अ
पसव्यं ॥ अनिर्दिष्टगोत्राणां प्रसन्नकुरजानां दुर्गतिं गतानामुद्धरणार्थं । सव्यं ० ।

ब्रह्माविष्णुरुद्राणां प्रीत्यर्थं पिं उत्रय विधानेन एकोद्दिष्ट विधि नाश्राद्धमहं करिष्ये। इ
ति संकल्प्य आसनं दद्यात्। ब्रह्मणे इदमासनं स्वाहा। इस्त०। विष्णवे इदमासनं
स्वाहा। इस्त०। रुद्राय इदमासनं स्वाहा। इस्त०। नावाहनं ॥ अर्घ्यपात्राणी पूरणी।
प्रति पात्रं द्वे द्वे पवित्रे सन्यस्य। शन्नोदेवी०। यवोसि०। इदमत्र। चंदनं च पुष्पं। अ
र्घपात्राणामर्चनं। विधेः पाद्यं स्मरणमस्तु ॥ स्वाहार्घ्या भवंतु। अस्तु०। ब्रह्मणे नम इदं पु
ष्पं। यादिव्या०। ब्रह्मन् एषते र्घः। स्वाहा०। विष्णवे नम इदं पुष्पं। यादिव्या०। विष्णो
एषते र्घः। स्वाहार्घ्या०। रुद्राय नम इदं पुष्पं। यादि०। रुद्र एषते र्घः। स्वाहार्घ्या०। पवित्रा
णि स्वस्वपात्रे स्त्वा अर्चनं कृत्वा ॥ यथार्हतं गंधाद्यर्चनं ब्रह्मणे स्वाहा ॥ यथा०। गं
धा०। विष्णवे स्वाहा। यथा०। गंधा०। रुद्राय स्वाहा ॥ अत्र गंध०। इदं वो०। सुज्योति
अस्य मात्र स्याचर्चनं०। आचमनं। पात्रे षु अन्नं परिविष्य स्मृत्यंतरं०। पृथ्वीते०। वि
ष्णोहव्यं०। इदमन्नादि यद्दत्तं यच्च दास्यामि तत्सर्वं स्वधापर्यंते भोजनं ब्रह्मणे स्वाहा।

एवं विष्णवे स्वाहा ॥ एवं रुद्राय स्वाहा ॥ विष्किरः ॥ ततः प्रागग्रान्दर्भानास्तीर्य अवनेजनी ।
पात्रे जलमादाय ब्रह्मन्नवनेनिक्ष्व । विष्णो अवनेनिक्ष्व । रुद्र अवनेनिक्ष्व । ततो व्री
हिमयं पिंडं दुग्धमधुशर्करा घृतादि द्रव्ययुतमादाय । इमं व्रीहिमयं पिंडं मधुसर्पि
समन्वितं । भूतप्रेतपिशाचानां यक्षादीनां भयं तथा ॥ रेवत्यादिग्रहाणां च ज्वरादी
त.४५ नां निवृत्तये ॥ पितृवंशे मृतायेच मातृवंशे मृतास्थये ॥ तृप्त्यर्थं ब्रह्मणः प्रीत्यै पिंडं ने
मेद्दाम्यहं ॥ ततो यवमयं पिंडं मधुरद्रव्यमिश्रमादाय ॥ इमं यवमयं पिंडं मधुसर्पिस
मन्वितं ॥ एकांतरं सततं च तृतीयकं चतुर्थकं ॥ पाक्षिकं मासिकं चैव वत्सरं तैलपै
वच ॥ नाशयेतो मम क्षिप्रं वासुदेवमहेश्वरौ ॥ पितृवंशे मृतायेच मातृवंशे मृता
स्थये ॥ तृप्त्यर्थं चैव विष्णोः प्रीत्यै पिंडं ददाम्यहं ॥ ततस्तिलमयं पिंडं मधुरद्रव्यमि
श्रमादाय ॥ इमं तिलमयं पिंडं मधुसर्पिसमन्वितं ॥ स्वगोत्रे वान्यगोत्रे वा मृतायेदु
र्गतिं गताः ॥ ये केचित्प्रेतरूपेण पीड्यंते च महेश्वर । तृप्त्यर्थं नेन पिंडेन भूतप्रेतादि

सैभवाः॥ दोषाः सर्वे प्रनश्यं तु रोऽज्वरादिसंभवाः॥ पितृवंशे मृतायेच मातृवंशे तथैव च। तथैव च मृता॥
त्स्यर्थं श्री महेशास्य प्रीत्यै पिंडं ददाम्यहं॥ ततः प्रत्यवनेजनं॥ ब्रह्मन्नवनेनिक्ष्व। विष्णो अ
वनेनिक्ष्व। रुद्र अवनेनिक्ष्व। ततश्चंदनादिभिः संपूज्य पृथगर्घं दद्यात्॥ पृथक्नैवे
द्यानि॥ इदमर्चितं नैवेद्यं ब्रह्मणे स्वाहा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा॥ पिंडानामर्चन
विधेः परिसमाप्तास्तु॥ अनेन ब्रह्मविष्णुरुद्रप्रीत्यै पिंडदानेन अस्मत्कुलजानां दुर्गति
गतानामक्षयातृप्तिरस्तु॥ आचमनं॥ सुप्रोक्षितमस्त्वित्यादि॥ ब्रह्मणः दत्तैशाउदं वो
पतिष्ठतां। विष्णोः दत्तैशाउदं वोपतिष्ठतां॥ रुद्रस्य दत्तैशाउदं वोपतिष्ठतां॥ ततस्तर्पणं॥
पात्रांतरे सुप्रोक्षितमस्त्वित्यादि विधाय॥ अद्येत्यादितिथौ॥ अपसव्यं॥ अनिर्दिष्टगो
त्राणामस्मत्कुलजानां पितृमातृवंशजानां दुर्गतिगतानामुद्धरणार्थं अक्षय तृप्तिकामः
ब्रह्मविष्णुशिवप्रीत्यै तर्पणमहं करिष्ये॥ सामान्ते ब्रह्माणं तर्पयामि॥ ब्रह्मा। ब्रा
ह्मणा। हा उस्त्वरता इतिडे॥ आनो रत्नवायि। प्रमासनस्त्वधं तु। स्वयं भूस्तथा। पर

मेष्टीन्त०। पितामहस्त्त०। ब्रह्मान्त०। चतुर्मुखस्त०। स्त्रष्टान्त०। वेधान्त०। विधिस्त०। सुब्रह्मति
स्ते: सुदर्शनेन तर्पयेत्॥ ततो विष्णुप्रीत्ये सतिरठ शंख जलेन तर्पणं॥ आदौ विष्णुसं
हितया। तत्र साम्नां तेन तर्पणं॥ इदं विष्णुर्विचक्रमे इत्यादि। अहोयि त्वामिद्धि हं वामहाइए। आ
भित्वाशूर नो नुमो वा। तवाह ३ सो। तवा। तवा। सोमः पवते जनिता मा ऽ रता। यि नारम्।
इत्यादि साम चतुष्टयं। हाउ हो हायि साम ११। इदं विष्णा अहो हायि। विमित। तेवार
यि। ष्णो परिचा। अहोयि विमित्रे विष्णो परिचा इए। इदं विष्णुर्विचक्रमे इत्यादि म
च दं॥ अतसी पुष्पसंकाशं पीतवाससमच्युतं॥ ये नमस्यंति गोविंदं न तेषां विद्यते
भयं॥ कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव। संसारार्णवमग्नानां प्रसीद प
रमेश्वर। अनादिनिधनो देवः शंखचक्रगदाधरः॥ अव्ययः पुंडरीकाक्ष प्रेतमोक्ष
प्रदो भव। विष्णुस्त०। पद्मनाभस्त०। सर्पा कुशास्त०। दामोदरस्त०। गोविंदस्त०॥
ततो रुद्रसंहितया शंखे विनक्त [illegible] तर्पणं॥ [illegible] राजा इत्यादि। त्र्यंबक मंत्रे

५

८

एवा रुद्र गायत्र्या । रुद्रस्त० । महेशास्त० । शिवस्त० । मानस्तोके० ॥ ततः पवित्रा ए पिंडाना
मुपरि निधाय दक्षिणां संकल्पं कुर्यात् ॥ अस्य श्राद्धस्य कृत प्रति ष्ठासिध्यर्थं दास्य
मानां दक्षिणां मुखवासं च ब्रह्मणे स्वाहा । एवं विष्णवे स्वाहा । रुद्राय स्वाहा ॥ अस्य श्रा
द्धस्य कृत प्रति ष्ठा सिध्यर्थं रजत सुवर्ण ताम्र गो व्रीहि यव तिल माष पायसानां नि
ष्क्रय द्रव्यं दास्यमानं ब्रह्म विष्णु रुद्रेभ्यो यथायथा विभागशः स्वाहा ॥ अद्य इ० तिथौ
अप सव्य अनिर्दिष्ट गोत्राणाम स्मत्कुल जानां पितृ मातृ वंशजानामुद्धरणार्थं स
र्वं ब्रह्मा विष्णु रुद्राणां प्रीत्यै कृतस्य श्राद्ध विधेः सर्वं परिपूर्णमस्तु । वेदा वेदशा० ।
यत्कृतं० । स्वस्ति सर्वतो० ॥ ततः पूर्णशोदकैः ब्रा ह्मणाः मैत्रं रक्षिषेकं कुर्युः ॥ ततः
कलशानां दानं । इमं कुंभं सजलं सयवं स्वर्णसानं सदक्षिणं ब्रह्म प्रीत्यै तुभ्य महं सं
प्रददे नमम । एवं विष्णु प्रीत्यै० ॥ रुद्र प्रीत्यै० ॥ कृतस्यास्य श्राद्धस्य सांग तासिध्यर्थं य
थासंपन्नेनान्नेन ब्राह्मणान् ब्रह्मा विष्णु रुद्र प्रीत्यै भोजनेनाहं तर्पयिष्ये ॥ अथ यस्मि

दक्षिणां संकल्पः ॥ ततो दीनानाथकृपणेभ्यः स्वशक्त्या अन्नादि देयं ॥ ततो ब्राह्मणान् सुमृष्टेना
न्नेन यथाविभवं संभोज्य स्वयमिष्टैः सह भुंजीत ॥ तद्दिने ब्रह्मचर्यादिनियमवान् भ
वेत् ॥ एवं कृते सर्वज्वरादिरोगशांतिर्भवति ॥ इति मुमुक्षुतादिसंमतत्रिपिंडकश्राद्ध
प्रयोगः ॥ छ ॥ अथापरत्रिपिंडकश्राद्धप्रयोगः ॥ तीर्थादौ गत्वा यथाविधिना स्नात्वा
तर्पणादि विधाय विष्णोः पूजां कुर्यात् । तत्र पिंडत्रयश्राद्धं आरंभे विष्णोः पूजनम
हं करिष्ये इति संकल्प्य यथावत्पूजां कृत्वा श्राद्धमारभेत् ॥ उदङ्मुखान् त्रीन् ब्राह्म
5 णानुपवेश्य अभावे दर्भचटून् सथैवनिधाय अपसव्येन दक्षिणाभि[illegible]मुखः सं
वं कुर्यात् ॥ अनिर्दिष्टगोत्राः अनिर्दिष्टाः श्राद्धापेक्षका एतद्वः पाद्यमित्यादि ए
वं स्थानत्रये पि । सव्यं । आचमनं । प्राणायामः । अपसव्यं । प्रसाद [illegible] । त्रिपिंडकश्रा
द्धं करिष्ये ॥ अग्निष्वात्ता० । श्राद्धभूमौ० । समव्याधा० । अपवित्र० । सव्यं । दशगायत्री
णतो न्विंद्र० । अपसव्यं । प्रोक्षणी । पिंडत्रयश्राद्धोपहाराणि पवित्रतास्कृ । सव्यं । देशका

५

ना०। अद्ये त्यादि तिथौ०। अपसव्यं। अनिर्दिष्टगोत्राणां अनिर्दिष्टापेतकानां दुर्गतिगतानां
त्स्यर्थं त्रिपिंडक श्राद्धं एकोद्दिष्ट विधिना अहं करिष्ये॥ अपसव्यं। अनिर्दिष्टगोत्रे
भ्यः अनिर्दिष्टापेतकेभ्यः इदमासनं स्वधा। एतम०। एवमपरयोः। नावाहनं। अर्घपा
त्रत्रयं सन्यस्य पात्रत्रये पि एवैकं तेषु रूपं पवित्रं सन्यस्य। शन्नो देवी०। तिलो
सि०। इदमत्र। चंदनं च पुष्पं॥ अर्घपात्राणामर्चनविधेः परिपूर्णमस्तु। स्वधा
र्घ्या०। अस्तु स्वधा। अनिर्दिष्टगोत्रेभ्यो नम इदं पुष्पं। या दिव्या०। अनिर्दिष्टगोत्राः
अनिर्दिष्टापेतकाः एतद्वो र्घ्यं ये चात्र वोनु यांश्च यूयमनु तेभ्यो युष्माभ्यं स्वधा।
अपरयोरप्येवं। स्वस्वपात्रे पवित्रं सन्यस्य अर्चनं कृत्वा सेचनं कुर्यात्॥ अनि
र्दिष्टगोत्रेभ्यः अनिर्दिष्टापेतकेभ्यो यथाय थावि भागेवः स्वधा। एवं द्वयोः॥
अत्र गंधपुष्प०। इदं वो ज्योतिः। अस्य श्राद्धस्यार्चनविधेः परिपूर्णतास्तु॥ सव्यं।
आचमनं। नाग्नौ करणं। पात्रेणान्नं परिविष्य सत्यं त्वर्तेन०। पृथ्वीते०। विष्णो कव्यं०। इदं

मन्त्रादि० त्तनिपर्यंतं भोजनं अनिर्दिष्ट गोत्रेभ्यः अनिर्दिष्टापे रूपेभ्यो यथायथा०
स्वधा॥ एवमन्यत्र॥ गायत्री। मधुवाता। विकिरः। आचमनं। दक्षिणाग्रान्दर्भा
नास्तीर्य अवने जनं पूर्वावाहनं पूर्ववत्। पात्रे जलमादाय अनिर्दिष्ट गोत्राः अनि
र्दिष्टा पे रूपकाः अवनेनिक्ष्वं ये चात्र त्वानु यांश्च यूयं मनु तेभ्यो सुधाम्यं स्वधा। ए
वमपरस्थानद्वयेपि सत्वा प्रथमं यवमयं पिंडमादाय॥ इमं यवमयं पिंडं मधु
सर्पिसमन्वितं॥ ददामि तस्मै प्रेताययः पीडां कुरुते मम॥ अनिर्दिष्ट गोत्रा अ
निर्दिष्टा पे रूपकाः एष वः पिंडो ये चात्र त्वानु यांश्च यूयमनु तेभ्यो सुधाम्यं स्वधा।
उदकं० इमं व्रीहिमयं पिंडं मधु सर्पिसमन्वितं॥ ददामि तस्मै प्रेतायय: पीडां कुरु
ते मम। अनिर्दिष्ट गो०। अनिर्दिष्टापे०। एषवः पिं०। उदकं पं०। इमं तिलमयं पिंडं म
धुसर्पिसमन्वितं॥ ददामि तस्मै प्रेतायय: पीडां कुरुते मम॥ अनिर्दिष्ट त्यादि०। प्रत्य
वने जनं पूर्ववत्। अत्र पितरो०। एतद इति सूत्र दानं॥ इदमत्र चंदन पुष्पे। धूतदी

पो। अर्घ्यत्रयं। नैवेद्यानि दृष्टमक्। इदं नैवेद्यं अनिर्दिष्टेत्यादि। पिंडानामर्चनं। एभिः

पिंडदानैः अनिर्दिष्टगोत्राणां अनिर्दिष्टापेक्षवानां अक्षयातृप्तिरस्तु॥ गयायां

पिंडं। स्वर्गेवासोस्तु॥ आचमनं। सुसंप्रोक्षितं। अपसव्यं॥ अनिर्दिष्टगोत्राणां अनि

र्दिष्टापेक्षवानां दत्तं अक्षय्योदकं पतिष्ठतां॥ एवमन्यत्र एवं वृपवित्रं प्रतिपिंडं निधा

य। विष्णुतर्पणं। सुसंप्रोक्षितमित्यादि कृत्वा अद्येत्यादि ति थौ। अपसव्यं। अनिर्दिष्ट

गोत्राणां अनिर्दिष्टापेक्षवानां अस्मत्कुलेजातानां दुर्गतिगतानां तृप्त्यर्थं सकृति प्रा

प्तये विष्णुसंहितया वैष्णवेरन्यैः सामभिः पुराणोक्तमन्त्रोपवृक्ष्य विष्णुतर्पणमहं क

रिष्ये॥ शंखोदकेन दुग्धतिः हमिश्रेण तीर्थवारिणा वा तर्पणं कार्यं॥ विष्णुसंहिता

इदं इमे इत्यादि साम १ संहितासमाप्तो अनादिनिधनो देवेत्यादि। इह इत्यंतर

तथाहतं सोमेति २। सोमः पवते इत्यादि चत्वारि। अहोयितामिं इप्रतर्निह ३।

सात्वहेतापि इत्यादि साम ९। इदं विष्णु अहोतायि। विमितानेवा द्वयि। स्रोपरिणां।

३५ होयि विं मित्रे । इदं विष्णुर्वि चक्रमे त्यादि सूक्त ६ । सहस्रशीर्षा सूक्त ५ । एवं तर्पणं
परिसमाप्य । कृतमेतद्विष्णुतर्पणं श्रीविष्णोः प्रसादात्सरिपूर्णमस्तु । केचिद्वि
विष्णुतर्पणं श्राद्धसमाप्त्यनंतरं कुर्वंति ॥ ततो दक्षिणासंकल्पः । अमीषां श्राद्धा
नां सत प्रतिष्ठासिध्यर्थं दास्यमानी दक्षिणा अनिर्दिष्ट गोत्रेभ्यइत्यादि । दातारो
नो० । अद्य पू० तिथौ । अपसव्यं अनिर्दिष्ट गोत्राणां अनिर्दिष्टापेक्षाणां श्राद्धं एको
द्दिष्टविधिनाकृत तस्य विधेर्यन्यूनमतिरिक्तं तत्सर्वं श्रीविष्णोः प्रसादात्सरिपू
र्णमस्तु । यत्कृतं० न विसर्जनमंत्रः । आमावाजस्य० । सव्यं । आचमनं । आयुःप्र
जां० । आ ३५ या । यस्य स्मृत्या० ॥ छ ॥ इति त्रिपिंडिकश्राद्धप्रयोगो द्वितीयः ॥ छ ॥
अथैकपिंडश्राद्धं ॥ तच्च कार्त्तिकशुक्लचतुर्दश्यां समाचारान्नि० न पिंडेन कुर्वंति ।
एतस्यापि एकोद्दिष्टधर्मत्वात् मध्याह्नकालः ॥ एक एव ब्राह्मणः स्वद्वौ ॥ नद्या
दौ गत्वा स्नात्वा संध्यातर्पणादिकं विधाय श्राद्धमारभेत् ॥ अपसव्येन दक्षिणामु

त्वेन सर्वं ॥ तिलानामादाय अच्छोभनैः ० । अनिर्दिष्ट गोत्राः अनिर्दिष्ट आपेक्षकाः एतद्वः पाद्य
मित्यादि । सव्यं आचमनं । भूर्भुवः स्वः समाधं । आचमनं । प्राणायामः । गायत्री गायत्रीं
च । अपसव्यं । प्रसादं दत्वा । एवं पिंड श्राद्धं ० । अग्निष्वात्ता ० । श्राद्ध भूमौ ० । सप्तव्याधा ० ।
अपवित्रः ० । दश गायत्री । एतोन्विंद्रं ० । अपसव्यं ० । पृथिव्या ० । सव्यं । भवती ० । एवं पिंड
श्राद्धे ० । देशः ० । अद्येत्यादि तिथौ । अपसव्ये । अनिर्दिष्ट गोत्राणां अनिर्दिष्टापेक्षका
नां दुर्गति गतानामुद्धरणार्थं एकोद्दिष्ट विधिना एवं पिंड श्राद्धमहं करिष्ये । अनिर्दि
ष्ट गोत्रेभ्यः अनिर्दिष्टापेक्षकेभ्य इदमासनं स्वधा । हस्त ० । नावाहनं । एवमर्घपात्रे ।
पवित्रमेवं तेतुरूपे । शन्नोदेवी ० । तिलोसि ० । इदमत्र अर्चं दत्वा । अर्घपात्रस्यार्चनविधिः
परिष्टुतौ । स्वधार्घ्यं ० । अनिर्दिष्ट गोत्रेभ्यो ० । या दिव्या ० । अनिर्दिष्ट गोत्राः अनिर्दिष्टा
पेक्षकाः एतद्वोर्घ्यं ये चात्र त्वोनु इत्यादि ॥ पवित्रमर्घपात्रे निधाय । अर्चनं कृत्वा सं
कल्पं कुर्यात् । यथा दत्तं गंधाद्यर्चनं अनिर्दिष्ट गोत्रेभ्यः अनिर्दिष्ट आपेक्षकेभ्योय

या०। अत्र गंध०। इदं वो०। अस्य प्राद्धस्यार्चनं०। आचमनं। भोजनसंकल्पः। सत्यं त्वर्त्तेन।
पृथ्वीते०। इदं विष्णु०। इदं मन्नादि०। भोजनं अनिर्दिष्टगोत्रेभ्य इत्यादि। प्रागवत् गा
यत्री। मधुवाता०। विकिरः। इदं भस्तदलो। दक्षा। एत पितर इत्यादिना आवाहनं। अवनेज
नं। अनिर्दिष्टगोत्राः अनिर्दिष्टापेत्तृकाः अवनेनिक्ष्वं ये चात्र त्वो नु इत्यादि। ततस्ति
8 लपिंडमादाय। इमं तिलमयं पिंडं मधुसर्पिसमन्वितं। ददामि तस्मै प्रेताय यः पीडां
कुरुते मम। अनिर्दिष्टगोत्राः अनिर्दिष्टापेत्तृकाः एष वः पिंडो ये चात्र वो नु०।
प्रत्यवनेजनं। अत्र पितरो०। सूत्रदानं। इदं मत्र। चंदनं च पुष्पं। धूपदीपौ। नैवे
द्यं। इदं नैवेद्यं अनिर्दिष्टं गोत्रेभ्य इत्यादि। पिंडस्यार्चनविधेः०। अनेन पिंडदानेन अ
निर्दिष्टं गोत्रेभ्य इत्यादि। पिंडस्यार्चनविधेः०। अनेन पिंडदानेन अनिर्दिष्टगोत्रा
णां अनिर्दिष्टापेत्तृकाणां मनस्यात्तृप्तिरस्तु॥ गयायां पिंडदानेन०। स्वर्गवासोस्तु०।
आचमनं। सुप्रोक्षितमित्यादि। अपसव्यं। अनिर्दिष्टगोत्राणां मानिर्दिष्टापेत्त

कानां दत्तंश्राद्धं वोपतिष्ठती । पवित्रीपिंडोपरि निधाय दर्व्वंनद स्वेवरूपस्पृदर्वेद विस्मृत
पर्णे । अस्यश्राद्धस्य कृतप्रतिष्ठा सिध्यर्थं दास्यमानीं दक्षिणां अमनिर्दिष्ट० स्यः स्व
धा । दातारो० । अघहर्वो० तिष्ठो आनिर्दि० सवानीत प्यर्थंदत स्यश्राद्ध विधैर्यन्मू
न मतिरिक्तं तत्सर्वं विष्णोः प्रसादात्परिपूर्णमस्तु । वेदशास्त्रो क्त० । यत्कृतं० । आ
मावाजस्य० । आचमनं । का ऽ५या । यस्यस्मृत्या० छा । इत्येव पिंड श्राद्ध प्रयोगः ।।
समाप्तः ।। संवत १८४ शके १६०९ आश्विन शुक्ल १२ चंद्रे । लि० शम्भजी वूतेन । शुभं ।।

१